M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1254

Title: Baudhayana Sutra

1254

Incomplete.

	:	Baudhayan Sutra	:	Title
	:	:	:	Author
	:	:	:	Editor
	:	:	:	Year, Vols.
	:	:	:	Publisher
1254	:	:	:	Remarks

श्रीगणेशाय नमः। अथोपव्याहरणी विज्ञायते क्रत्वादौ क्रतुकामं कामयीत यज्ञांगा
दो यज्ञांगकाममिति प्राक्कूलान्दर्भान्संस्तीर्य तेषु प्राङ्मुखो यजमान उपविश्य जप
तियाः पुरस्तात् प्रस्नवं तदुपरिष्टात् सर्वतश्चैव याः। ताभी रश्मिपवित्राभिः श्रद्धां यज्ञमार
भे। देवा गातुविदो गातुं यज्ञाय विंदत। मनसस्पतिना देवेन वाताद्यज्ञः प्रयुज्यतामि
ति श्रद्धे एहि सत्येन त्वाह्वयामीत्याकूत्या वेदनं करोत्याकूत्यै त्वा कामाय त्वा समृधे त्वा
पुरो दधे मत्त्वायजीवसे। आकूतिमस्यावसे काममस्य समृध्यै। इंद्रस्य युंजते धियः।
आकूतिं देवीं मनसः पुरो दधे यज्ञस्य माता सुहवा मे अस्तु। यदिच्छामि मनसा सकामो।
विदेयमेनद्धृदये निविष्टमिति मनसा चित्तैः संकल्प्यते विरूपैः सर्वकामोऽग्नीनाधास्य
इत्यग्न्याधेये स्वर्गकामो दर्शपूर्णमासाभ्यां यक्ष्य इति दर्शपूर्णमासयोः स्वर्गकाम
श्चातुर्मास्यैर्यक्ष्य इति चातुर्मास्येषु स्वर्गकामः पशुना यक्ष्य पशुबंधे स्वर्गकामः सो १

मेन यक्ष्य[illegible] इति सोमे सर्वकामोऽग्निं चेष्य इत्यग्निचयने हीनेवा यथाकामो यत्कामो
तन्मे समृध्यतां वा यजते तन्मे ऋध्यतामिति तन्मे संपद्यतां काममित्यथर्त्विजां प्रतिवचनं तन्न ऋध्यतां तन्ने समृ
ध्यतां तन्ने संपद्यतां काममित्यथो तथेति प्रतिवचनमथर्त्विजो देवयजनं याचतेऽध्वर्यो दे
वयजनं मे देहीत्यध्वर्युमादित्यो देवो देवोऽध्वर्युः स ते देवयजनं ददात्वित्यों तथेति प्रतिव
चनं ब्रह्मन्देवयजनं मे देहीति ब्रह्माणं चंद्रमा देवो देवो ब्रह्मा स ते ददात्वित्यों तथेति प्रतिवच
नं होतर्देवयजनं मे देहीति होतारमग्निर्देवो देवो होता स ते देवयजनं ददात्वित्यों तथेति प्रति
वचनमुद्गातर्देवयजनं मे देहीत्युद्गातारं पर्जन्यो देवो देव उद्गाता स ते देवयजनं ददात्वि
त्यों तथेति प्रतिवचनं सदस्य देवयजनं मे देहीति सदस्यमाकाशो देवो देवः सदस्यः स ते दे
वयजनं ददात्वित्यों तथेति प्रतिवचनं होत्रका देवयजनं मे दत्तेति होत्रकानापो देव्यो दे
व्यो होत्राः शंसिन्यस्तास्ते देवयजनं ददात्वित्यों तथेति प्रतिवचनं चमसाध्वर्यो देवयज
देवे

नं मे दत्तेति यमस्याध्वर्यू अश्वश्चैषो देवो देव्याश्च मस्याध्वर्यवस्ते देवयजनं ददतीति श्रोतं तथे
ति प्रतिवचनमापिवान वै देवयजनं याचते आदितएव नीर्थे स्नात्वा दीक्षा हतं वासः परि
धाय शुद्धो हे वस्तुतिः ततो मे ध्यो वृपाष्म । ५ । पथा ब्रह्मचारी सह कार्य प्रत्यय आचतु
र्थीकर्मणो । भिस्सम् । श्रमा । को वेदकर्माणि प्रयोजयेत्स्या ॐ गप कर्माण्युदगपवर्गाणि वा
प्राङ्मुखः प्रदक्षिणं यज्ञोपवीती दैवानिकर्माणि कर्माणि दक्षिणामुखः प्रसव्यं प्राची
नावीती । पित्र्याणि । इति सूत्रकारस्तैः प्रक्रोवा यथान्यायं छंदोग ब्राह्मणे यथा वे दक्षि
णः पाणिरेवं देवयजनं यथा सव्यस्तथा पितृयजनं यथापित्र्य यजनं तथा श्मशान
करणं यथा श्मशानकरणं तथा भिचरणी । धो विधि पशुसोमपुरोडाशः देवयजनं न
वि देवगुरुतरतो देवयजनमात्रम निशिनात् अथ च्छिन्ना वर्षे विज्ञायते ब्राह्मणा
(वरद्धि) कर्त्विजो यो नि गोत्रश्रुतवृत्तसंपन्ना विगुणांगा चिक्रिलिनान परिरवाति २

कोविज्ञानांतगानांस्यजाता नानन्न्यानहीलेयवाले यपुत्रिकापुत्र परक्षेत्र सहोढ कानीना
पुत्रावरवृद्धिप्रवरान्यरिहाय अंगिरसोध्वर्यु वसिष्ठो ब्रह्मा विश्वामित्रो होता यास्य उद्गाता
कौषीतकः सदस्यो वसिष्ठो भृगवंगिरसो वा योनि हतं विधास्य प्रमाणमिति एकेनाश्वे ह्यणीता
गा व्यापन्नो श्रोनेव वृत्तीन कुनखिन मध्वर्युमाकुलीनमिन ब्रह्माणम पंढ होतारमाकिरालुमु दंतुरः
ऽश्वमी द्गातारमशिपिविष्टः सहस्यमध्य प्रतिप्रस्थातारं होतारं त्यध्वर्युपुरुषा ब्राह्मणाच्छंस्याग्नी कौशिकः
ध्रः पोतेति ब्रह्मणो मैत्रावरुणो छावाको ग्रावस्तुदिति होतुः मस्तोतारं प्रतिहर्तासुब्रह्म
मातः सवनेवो भविता ण्य उन्नेतारं तुरभिगस्रो ध्रुवगोपः सदस्य इति सदस्य स्यस्व प्रधानास्वप्रधानाइत्येके
दशावेकादशावाद्यमस्याध्वर्यवोन्ये दक्षिणाभिः परिक्रीता भवंतीति विज्ञायते तस्मादग्नि
होत्रस्य यज्ञक्रतोरेक ऋत्विग्दर्शपूर्णमासयोश्चत्वार ऋत्विजः अध्वर्युर्ब्रह्मा होताग्नीध्र इ ऋतुद
ति चातुर्मास्येषु प्रतिप्रस्थाता पंचमः पशुबधे मैत्रावरुणः षष्ठः सर्वे सौम्येध्वरे नान्कर्म क्षिणतो वा ह्यमि

नः कर्मणो वृणीते केके कुमुपसंहृत्य ब्वो दृश्ये दस्य व ह्रमाध्वर्यवेण त्वा गच्छामी याज यतुमाभ्वा
मिति ब्रह्मत्वेन होत्रेणोद्गात्रेण सदस्येनेति न सहस्यो विघ्नत इत्येके स्वेन स्वेन कर्मणा होत्रका
न्होत्रकानित्येके नमुरूमा होत्रकाश्चान माध्वर्यवोऽध्वर्युर्वा ऋत्विजां प्रथमो वृज्यते तेन स्तोमि
मो कस्य इति आदित्यो देवो दैवोऽध्वर्युः स मेऽध्वर्युरध्वर्योऽध्वर्युं त्वां वृण इत्यध्वर्युमादित्यो देवो दै
वोऽध्वर्युः स तेऽध्वर्युस्तेनानुमतः कर्मैवाहं करिष्यामीत्यों तथेति प्रतिवचनं चंद्रमा देवो दैवो ब्रह्म
स मे ब्रह्मा ब्रह्मन्ब्रह्माणं त्वा वृण इति ब्रह्माणं चंद्रमा देवो दैवो ब्रह्मा स ते ब्रह्मा तेनानु
मतः कर्मैवाहं करिष्यामीत्यों तथेति प्रतिवचनमग्निर्देवो दैवो होता स मे होता होतर्होतारं
त्वा वृण इति होतारमग्निर्देवो दैवो होता स ते होता तेनानुमतः कर्मैवाहं करिष्यामीत्यों तथे
ति प्रतिवचनं पर्जन्यो देवो दैव उद्गाता स म उद्गातोद्गातरुद्गातारं त्वा वृण इत्युद्गातारं पर्जन्यो
देवो दैव उद्गाता स त उद्गाता तेनानुमतः कर्मैवाहं करिष्यामीत्यों तथेति प्रतिवचनमाका २

शो देवो दैवः सदस्यः स मे सदस्यः सदस्य सदस्यं त्वा वृण इति सदस्यमाकाशो देवो दैवः स
दस्यः स ते सदस्यस्तेनानुमतः कर्मैवाहं करिष्यामीत्यों तथेति प्रतिवचनमापो देव्यो दैव्या हो
त्राशंसिन्यस्ता मे होत्राशंसिन्यो होत्रका होत्रकान्वो वृण इति होत्रकानापो देव्यो दैव्या हो
त्राशंसिनस्ता मे होत्राशंसिनो होत्रकान्वो वृण इति होत्रकानापो देव्यो दैव्या होत्रा
वयं स्ते होत्राशंसिन्यस्ताभिरनुमताः कर्मैव वयं करिष्याम इत्यों तथेति प्रतिवचनं रश्मयो देवा
दैव्याश्चमसाध्वर्यवस्ते मे चमसाध्वर्यवश्चमसाध्वर्यवश्चमसाध्वर्यून्वो वृण इति चमसा
ध्वर्यून्रश्मयो देवा दैव्याश्चमसाध्वर्यवस्ते ते चमसाध्वर्यवस्तैरनुमताः कर्मैव वयं करिष्या
म इत्यों तथेति प्रतिवचनं हुतो हुतो जपति महन्मे वोचो यशो मे वोचो भर्गो मे वोचो भर्गो मे वो
चस्तपो मे वोचः स्तोमं मे वोचः श्रियं मे वोचो भुक्तिं मे वोचो विश्वं मे वोचः सर्वं मे वोचः सर्वं मे कृ
त्वा या मे वोचस्तन्मा मवतु तन्मा विशतु तन्मा जिन्वतु तेन मे भुक्षीय देवा देवमेति सोमः सो

बौ.
४
मभेत्येतं तथेति श्रान्तिवचनं ॥२॥ सिध्महे मेमन्युर्या द्वेष्मे तरामयो हृ के मे क्षुद्वेषे मे घासिर्धन्व निमे पिपासा राजग्र सू.
हे मे शानयाश्मनि मे तडिर्गिरि मे मेरिश्यः शाप्यके मे ह्वीर वत्स्ये मे वेपथुः कूर्मे मे गरो गावृक्षे मे पस्मर्याऽ डियेमे मत्युर्प्रौत्व
ये मे पाप्मा समतेमे निर्ऋतिर्दुष्कीर्त्तौ मे रत्यिः परस्वतिमेऽसमृद्धिः स्वडगे मञ्चार्तिर्गवषे मञ्चांध्यांगोरे मे बाधिर्यम्
क्षे मे शोको गोधायां मे स्वेदो जरायां मे हिपः कृष्णशकुनौ मे मीतुता कश्चे मे पापोगंधउल्लुके मे स्वप्न्यशकुके मे दुर्ष्याम
की टे मे दुर्भिक्षः कुठ्ठले मेमऽस्पोलल्ले मे प्रस्त्रोबुमेत स्पर्षे मे श्रमो यां मञ्चार्ष्यं कोशे मे गंधः कुमार्यां मेलंकारः सूकरे मे
कूदसुः प्रदाखुनि मे स्वप्नोऽ जगरेदुः स्वप्नो विद्युति मे भयसो लोमायां मे पाप्माऽ लक्ष्मीस्त्री षुमेऽ नृतमजासु मेकर्क
शीञात्ये मड़त्याशूद्रे मे स्तेयं वैश्ये मे कार्मकृत्यं राजन्यो बंधुनिमेऽ ज्ञानं नैषादे मे ब्रह्महत्या कुलिंगे मे भ्रूण वधुरूरले
मे बिलास्तडद्भिलि मे वमनिः किंपुरुषे मारो दोहूप्यिनि मे निष्पद्दस्त्विारमे किलासः शुनि मे डग्निं
स्नावन्येषु मे म्लेच्छो विदेहेषु शीपदो महावर्षेषु मेल्लो म्लेज वत्क्षु मे तप्माङ्कुटौ मे काशिकेश्वाकु
षु मे पित्तं कलिंगेषु मेऽमे धर्मस्वतर्यां मे प्रजनस्त्वापुंश्चल्यां मे दुश्चारित्रं मारखुनि मे दृतरोगो म ४
क्षिकायां मेप्वल्फशाः शुके मे हारिमा मयूरे मे जल्प्यावृषे मे जराबाधे मे पापवादोऽक्षु मे स्त्र

मो ब्रह्मोझे मोकिल्बिषमपेहपाप्मन्पुनरपनाशिनो भवानः पाप्मन्सुकृतस्य लोके पाप्मंधे
यविहतोयोनः पाप्मन्नजहाति तमुत्वा जहिमो वयमन्यत्रास्मन्निविशतात्सहस्राक्षो
अमर्त्यो योनो द्वेष्टि सरिष्यतु यमु द्विष्मस्तमुजही त्यथतां दिश मेमोना अपउन्निव तिय
स्यामस्य दिशि द्वेष्याभवाति दुर्मित्रास्तस्मै भूयासु र्योस्मान्द्वेष्टि यं च वयं द्विष्मइत्यथाप
उपस्पृश्य यथेतं प्रविशंति ॥३॥ अथेदमग्न्याधेयं तस्यकः कर्मण उपक्रमो भवती त्युक्ता
४ ऋतुनक्षत्राण्युक्तमात्मनः पुरश्चरेंकथमत्रानुपूर्व्यं भवतिस्नानपवनमंत्राचमनमंत्र
प्रोक्षण पुण्याहवाचनाभिश्रद्धामाहृत्या कृत्वावेदं नंकृत्वोपव्याहृत्याहैतोदत्वाहविध
त्वादेवयजनं याचित्वा देवयजनमादाय स्फ्यमादायांतरेणवेद्यकरा वुद्देनप्रपायज
घनेनगार्हपत्यं तिष्ठन्नाशींस्फ्येन गार्हपत्यस्यायतनमुद्धन्त्यमानमस्याअमेध्यमप
उद्धन्यमानमिति उद्धन्यमानप्रभृति विराजक्रमोपस्थानांतं सर्वं यजमानेन सह कार्यं

नाभ्यानं यजमानस्य हंतु। शिवा नः संतु प्रदिशश्चतस्रः। शं नो माता पृथिवी तोकसातेत्यथै
५ नं दक्षिणतोऽक्षति शन्नो देवीरभिष्टय आपो भवंतु पीतये। शंयोरभिस्रवंतु न इत्येवमेवान्वा
हार्यपचनस्यायतनमुद्धत्यैवमाहवनीयस्यैवमितरयोर्वेदिकरिष्यन्भवत्यथांतरेणावे
द्यन्तरालेऽस्मिन्नुद्देशेनोदगुपनिष्क्रम्य तां दिशं यंति यत्रास्य संभारा उपक्लृप्ता भवंत्या
पि वोत्तरेण शालायाः सर्वे संभारा उपक्लृप्ताः स्युरपि वांतर्वेदि प्राचीनं तन्मंत्रानुपू
र्व्यमेकैकं संभारमेकैकेन यजुषा संभरति वैश्वानरस्य रूपं पृथिव्यां परिस्रसा स्योनमा
विशंतु नः। इति सिकताः संभृत्याभिदधात्येवमुत्तरमुत्तरं संभारमुत्तरेणोत्तरेण यजुषा
संभृत्य संभृत्याभिदधात्यूषान्सिकताश्चाखूत्करं वल्मीकवपां सूददं वराहवि
हतं पुष्करपर्णं शर्कराश्च सर्वेषां पार्थिवानामुत्तरेण यजुषा हिरण्यशकलान् ५

हरत्यथ यानस्पत्याभिर्वानस्पत्याः शाखा आर्द्राः सपलाशाः सप्रारोहाः प्रादेशमात्रीरप्र
तिशुष्काग्रा आहरत्यपि वा यथालाभं पर्णं द्वाभ्यां शिविरस्याश्वत्थस्य तिस्रः समिध आर्द्राः
सपलाशाः सप्रारोहाः प्रादेशमात्रीरप्रतिशुष्काग्रा आहरत्यपि वा यथालाभं शिविरयादश्वत्था
त्संभृताम्न हव्याः शमीरमभिसंस्कृतास्ष्ठ प्रजापतिना यज्ञमुखेन संभितास्तिस्रस्त्रिवृ
द्भिर्मिथुनाः प्रजात्या इत्यथ मुंजकुलायमाहरति या ते अग्न ओजस्विनी तनूरोषधीषु
प्रविष्टा तां त इह संभरामीत्यथास्मा अरणी आहरत्याश्वत्थीं शमीगर्भामप्यशमी
गर्भां वा चतुरंगुलेषु मेधां द्वादशांगुलं विस्तीर्णां षोडशांगुलमायामामपि वा प्रादेशमात्रीं
सर्वतः समां चतुरंगुले गुमु स्तेधां तस्या उत्तानायाः अनुलोममधस्तात्प्रतीचीनप्रवणं प्रज
ननं कुर्वंति लावतीमेयोत्तरारणी मथ्यैनेआहरत्यश्वत्थाद्धव्यवाहाद्विजातामग्ने तनूं य
ज्ञियां संभरामि। शांतयोनिं शमीगर्भमग्नये प्रजनयितवे यो अश्वत्थः शमीगर्भ

आरूरोह त्वे सचा तं ते हरामि ब्रह्मणा यज्ञियेभिः केतुभिः सह इत्यथैतान्त्संभृतान्त्संभा
६ रान्पुनरेव संप्रभरति यं त्वा समभरं जातवेदो यथा शरीरं भूतेषु न्यक्तं । स संभृतः सी
दाग्निवः प्रजाभ्य उरुं णो लोकमनु नेषि विद्वानित्यथ वैष वर्त्तीद्वो हन्तं हलाशुरान्य
राभाव्य सोमावास्यां प्रत्यागच्छन्ते पूर्वेद्युः पितरः पूर्वेद्युरागच्छन्ति त्तन्यज्ञो
गच्छन्तो देवाः पुनरमावास्यां तमेभ्यो न पुनरदद्युस्ते ब्रुवन्वरं वृणामहे अथ वः प
नः सदास्याम अस्माभ्यमेव पूर्वेद्युः क्रियतामिति तमेभ्यः पुनरददुः तस्मात्पि
भ्यः पूर्वेद्युः क्रियते यत्पितृभ्यः पूर्वेद्युः ~~क्रियते~~ करोति पितृभ्य एव तद्यज्ञं निष्क्रीय यज
मानः प्रतनुत इति ब्राह्मणमथ यदि गां न लभेत मेषमजं वा लभेत पिवाध्रुत मोदनं प
त्वा तस्योपरिष्टात्संस्कृतमाज्यं पयो वानीय तस्मादेतत्सर्वं करोति यज्ञवाकार्ये विज्ञा
यतेन धेन्वैवाप्तलद्वितीयदाज्यं पयो वा नडुहस्तं इलाइतिगोरेवांगसामान्यात्संप्रच्छ ६

श्चांबरीषं वोत्तपनीयं वाभिप्रव्रजंत्यपि वोपासनमेवाभिप्रव्रजंत्यर्धमौपासनं कुर्व
ति सर्वं वा ब्रह्मौदनीकं कुर्वंति सोऽन्वैव विहिह्यत समानं कर्म संभारनिवपनादथ तृतीयं
संभाराणां त्रेधा विभज्य सभ्यावसथ्ययोराहवनीये वा सभ्यावसथ्ययोः संकल्प्य समानं
मस्तानि दधानात्पंचपंचकनानावृक्षीयाः समिधोऽभ्यज्यादधाति कथमत्रानुपूर्व्यं भवत्य
श्वत्थश्चौदुंबरश्च शमी च विकंकतश्चेत्येतदत्रानुपूर्व्यं भवति कथमु खल्वग्न्यादित्ययोरंतर्द्धि
तीश्चाग्न्यादित्ययोरंतरुदश्चपद्विकंकतजेनतान्येदशाहोत्रर्थमुद्धरेदिति तं चसमासएवैतदुप
पद्यते नान्यत्र प्रणीतस्याग्नेर्लौकिकत्वाघ अग्निहोत्राद्धतंस्यासौऽग्निः कर्मांतं तस्य धारणमि
त्यपवृत्ते कर्मणि लौकिकः संपद्यते प्रसिद्धाननुहवींषि प्रसिद्धा अन्याधेयदक्षिणा ददा
ति ताश्चेन्नाधिगच्छेद्दास्तांस्यतावंति मंथान्वौदनान्वै तावनो दद्यान्नेनो ह वै काममवाप्नोत्य
थैकां गां दक्षिणां दद्यादिति पैंगलाय निब्राह्मणं भवति न त्वेवानाहिताग्निः स्याद्विज्ञायते

द्देवानांवाएषोन्यतमोयएषआहिताग्निरित्यथयदस्याग्निमुद्धरंति सहस्त्रंतेनकाममु
८ ग्धोवरुंधेथयदग्निहोत्रंजुहोति सहस्त्रंतेनेत्यपरिमितमेवेदमुक्तंभवति ॥२॥ अथाग्न्या
धेयस्योपवसथइत्युपकल्पयते ग्रामइसलामहतंवासश्चतुरउदकुंभांस्त्रीनौदुंबरान्छ
लानौदुंबरींदर्वीमेकांवपाश्रपणीमविशाखामौदुंबरीमेवसर्वानेवान्याःस्थालीपाका
त्येतत्यज्ञिकान्संभारानेरकोपबर्हणेआंजनाभ्यंजनेआज्यंतृणमुष्टिंस्फ्यंस्त्रुवमितिदक्षि
णतएतत्परिश्रितंभवति तस्यैतस्मिन्परिश्रिते प्राङ्मुखस्यकेशांतंकरोति तूष्णींत्रीणि
दर्भपुंजीलान्युपनियत्यवपति वपेत्स्वपदेवेनसवित्राप्रसूतोब्रह्मणासंशितोहं।
यानिमइतऊर्ध्वलोमानितानिमेस्वस्त्ययेसंलिख्यथेनमुष्णकेशश्मश्रुनिकृतनखमु
दकुंभेनाभ्यवनयन्वाचयतीमाआपःशिवाःसंतुदुष्कृतंप्रवहंतुमे।शुद्धाःप्रयुंजीमहिकृ ८
तमितिस्नातःप्राङुपस्पृश्याहतंवासःपरिधायालंकृत्यांगुःस्थेनमेकाविंत्यादर्भपुंजीले

स्त्रेधाविभक्तैःसप्तभिःसप्तभिस्तृणपूलीपाथायेत्वोदपात्रमादायेमांदिशंनीत्वावनुष्य
थएतस्मिन्नेवोदपात्रेवेक्षमाणोपाप्मनोविनिधीन्वाचयतिसिंहेमन्युर्व्याघ्रेमेतराम
यइत्यंतमनुवाकंमिगधामिनीयापःपरास्यपात्रमनवेक्षमाणआयंतिहस्तपादान्प्रक्षा
ल्येतेनैवयथेतमेत्यपवमानःसुवर्जनइत्येतमनुवाकंयजमानंवाचयन्नग्निर्जयतआ
यात्यादिध्ममादीप्यान्वाहार्यपचनवेलायांसादयित्वाथोधयित्वाबर्हिषापरिस्तीर्यांगु
लिप्योत्पूयोत्तरतएतावपासादयतिचतुरउदकुंभांस्त्रीनौदुंबरान्छलानौदुंबरींदर्वी
मेकांवपाश्रपणीमविशाखामौदुंबरीमेवदक्षिणतःसर्वानेवान्यास्थालीपाकात्येतत्य
ज्ञिकान्संभारानेरकोपबर्हणेआंजनाभ्यंजनेआज्यंतृणमुष्टिंस्फ्यंस्त्रुवमितिदक्षिण
तोग्निदेवनंकरोति तदेकस्मान्नपंचाशतोक्षान्निवपत्यथस्फ्यमादायसकृदेवदक्षि
णोद्धत्यपहताअसुरारक्षांसिपिशाचायेक्षयंतिपृथिवीमनु।अन्यत्रेतोगच्छंतुयत्रैषां

गतं मन इत्यथैनदङ्गिरवोक्षत्युदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः। असुंयईयुरवृ
का ऋतज्ञास्तेनोवन्तु पितरो हवेष्वित्यथोल्मुकमादत्ते य आदहानास्वधयान वानि पित्र्याणि रू
पाण्यसुराश्चरंति। परापुरो निपुरो ये भरंत्यग्निष्टान्लोकात्प्रणुदात्यस्मादिति तेनोल्मुकेनम
भितपत्यग्निः पावकः सुदिनानि कृण्वन्नितो सुरान्नुदताद्दूरमोकसः। पितृणां ये वर्णं कृत्वेह
भागमिच्छंतरंति तद्वैवयंतं करोति तिलमिश्रं तु उल्मुक आउयस्तोकं अश्नोत य तिलदक्षिणाग्रं ब
र्हिस्तृणाति सकृदाच्छिन्नं बर्हिस्तृणा मृदु स्योनं पितृभ्यस्त्वा भरम्यहम् अस्मिन्त्सीदंतु मे
पितरः सोम्याः पितामहाः प्रपितामहाश्चानुगैः सह। असुंगमाः सत्ययुजो ह्येकामसआनो हवं
पितरो ध्यागमंतु। एहगच्छंतु पितरो हविषेऽअत्तवेऽस्मिन्यज्ञे बर्हिष्यानिषद्य मादीरः प्रजामायुर्न
गीत्यथैभ्य एरकोपबर्हणे निवेदयत आसनं शयनं मे तयोः सोम्यास आगताः प्रियाज
नायनोभूत्वा शिवा भवत शंकरा इत्येभ्यः पानान्याहारयति मधुपानं क्षीरपानं सक्तुपानं यद्

भवत्यन्यद्ब्राह्मणेभ्यो ददात्यन्यदुपनिनयेत्येतद्वः पितरः पितामहाः प्रपितामहाः पानमित्यथैके
नोदकुंभेन मार्जयन्तीति तूष्णीं तद्दक्षिणान्पर्युपविशंतीति वा तत्र वः पितापुत्राः पितापुत्रस्तु ज्येष्ठो दक्षिण
तोऽनुजः पश्चात्कनीयानुत्तरतो ह्यादशाक्षापिता हि छिन्न मितां छिन्नपते द्वादशाज्ये ऽस्ता द्विजयते द्वा
दशानुभक्ता द्विजयते ऽथ ये तिष्ठिर्व्यंते तान्कनीयादं समुपसमुहंत्यथ यदि द्वौ भवतो द्विरात्रमः
पिताथ यद्येको ऽमात्ततीयाथ यादिनैकं एवं त्वभौ द्विरायामो जायापती वा त्रिशुन्यायमेतद्वयोः
कृतं कृतं कृतमित्येव व्यवगच्छंति धृतागोरित्युक्तो निष्ठंत्यथैभ्यो बर्हिरादाय गामुपाकरोति पितृ
भ्यस्त्वा पितामहेभ्यस्त्वा प्रपितामहेभ्यस्त्वाजुष्टमुपाकरोमीति तूष्णीमित्येके ऽथैनमद्भिः प्रोक्षति पि
तृभ्यस्त्वा पितामहेभ्यस्त्वा प्रपितामहेभ्यस्त्वाजुष्टां प्रोक्षामीति तूष्णीमित्येके तामत्रैव प्रतीचीं नी
रसीं दक्षिणापदं संज्ञपयंति मस्यैव संज्ञप्तायाभद्भिरभिषेकं प्राणानाप्याययंति तूष्णीं तूष्णीं वपा
मुत्खिद्य हृदयमुद्धरंति प्रज्ञातानि चावदानानि प्रज्ञातो वमतोऽन्नो तान्येतेष्वेव शूले शूपमिष्ट्वैतास्मि
न्नेवाग्नौ श्रपयंति श्रृतायां वपायां पंचस्रुवाहुतीर्जुहोति याः प्राचीः सभवंत्याप उत्तरतश्च याः। अद्भि

विश्वस्य भुवनस्य धर्त्रीभिरंतरन्यं पितुर्दधे स्वधा नमः स्वाहा। अंतर्दधे पर्वतैरंतर्मह्या पृ
थिव्या दिवा दिग्भिरनंताभिरूतिभिरंतरन्यं पितामहाद्दधे स्वधा नमः स्वाहा। अंतर्दध ऋ
तुभिः सर्वैरहोरात्रैः ससंधिकैः। अर्धमासैश्च मासैश्चांतरन्यं प्रपितामहाद्दधे स्वधा नमः स्वा
हा। यन्मे माता प्रलुलोभ चरत्यननुव्रता। तन्मे रेतः पिता वृङ्क्तामाभुरन्योऽपपद्यतां स्वधा नमः
स्वाहा। यदग्ने क्रव्यादगमदहल्लोकान्प्रणयं जातवेदः। तद्वो अहं पुनरावेशयाम्यरिष्टाः सर्वै
रंगैः संभवत पितरः स्वधा नमः स्वाहेति त्रेधा वपां विछिद्य। बर्हिर्दर्व्या जुहोति सोमाय पितृमते
शुष्मिणं जुहोमि हविः। वाजिनि हव्यं जुषस्व नः स्वजा हव्यं देवेभ्यः पितृभ्यः स्वधा नमः स्वाहा। अंगि
रस्वंतमूतये यमं पितृमंतमाहुवे। वैवस्वते दमा हविर्नः स्वजा हव्यं देवेभ्यः पितृभ्यः स्वधा नमः स्वा
हा। यदग्ने कव्यवाहन पितॄन्यक्ष्यृतावृधः। प्र देवेभ्यो वह हव्यं पितृभ्यश्च स्वजा हव्यं देवेभ्यः
पितृभ्यः स्वधा नमः स्वाहेति हुत्वा दर्वं मध्यधायां पिंडानामावृतान्यवदानानि ददाति
हृदयमेवाग्रे अथ सव्यं मतस्नमथ दक्षिणमेतत्ते ततासौ ये च त्वामनु याँश्च त्वमत्रान्वस्यै

षाते तत स्वधाक्षितिर्यावती पृथिवी तावती ते मात्रा तावतीं त एतां मात्रां भूतां ददामि पृथि
व्यामितमसि ततामहाय माक्षेष्ठा इति द्वितीयं ददाति एतत्ते पितामहासौ ये च त्वामनु याँ
श्च त्वमत्रान्वस्यै षाते पितामह स्वधाक्षितिर्यावदंतरिक्षं तावती ते मात्रा तावतीं त एतां मात्रां
भूतां ददाम्यंतरिक्षेऽपरिमितमसि पितामहाय माक्षेष्ठा इति तृतीयं ददात्येतत्ते प्रपितामहासौ ये च
त्वामनु याँश्च त्वमत्रान्वस्यै षाते प्रपितामह स्वधाक्षितिर्यावती द्यौस्तावती ते मात्रा ताव
तीं त एतां मात्रां भूतां ददामि दिव्यामितमसि प्रपितामहाय माक्षेष्ठा इत्यत्र पितरो यथाभा
गं मंदध्वमित्युल्मुकान्नैकेनोदकुंभेन मार्जयति तूष्णीं मध्येभ्यो गामुपपरेत्य लोहितमुप प्र
वर्तयति यानि रक्षांसि स्वस्त्र भागानि ये वा पितृपितरो हरंतां विहरंतां तर्पयंतु रुधिरं तेये नः
पतिता गर्भा असृग्भाज उपासते तेभ्यः स्वजा स्वधा नमस्तत्पृण्वंतु मदंतु च ये आमा ये च
काप्रिवशुष्मः पतंति नः तेभ्यः स्वजा स्वधा नमस्तत्पृण्वंतु मदंतु च। ये कुमारा या स्त्रियो

१० येविज्ञाताःपतंतिनः।तेभ्यःस्वधास्वधानमस्तुपृण्वंतुमदंतुतेस्वागत्यांजनंददात्यथाभ्य
ञ्जनंददात्यथवासांसिददात्यथषड्भिर्नमस्कारैर्विपर्यासमुपतिष्ठतेऽथवीरंयाचतेयेनानु
त्याप्यप्रवाहयतितेऽभिमन्त्र्याह्वयन्तेमनोन्वाहुवामहेआनएतुमनःपुनःपुनर्नःपितरोमन
स्त्वेवैतदाहतेवाएवंविदेब्राह्मणायदत्वान्यदसनीयंवासःपरिधायदक्षिणोपपरे
त्यऊर्मीजायतेयास्तुगंधारस्तावर्णोबलंवामादेतदस्तेतामआपःशिवाःसंतुदुष्टुतंप्रव
हंतुमेयास्मान्निम्नेत्रयोलोकास्तेजसायशसाहेताःतामआपः॰तुमायाःप्राचीर्याद
क्षिणायाःप्रतीचीर्याउदीचीर्याऊर्ध्वीरेवतीर्मधुमतीरापःस्त्वंतामआपः
शिवाःसंतुदुष्टुतंप्रवहंतुमद्ध्यस्त्वेवैतदसनीयंवासोदिक्ष्याव्यत्यपरिधायप्रजापतस्य
वीन्नरूदेतिप्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूवयत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणामितिहुतोहविषोजात १०
वेदाअग्रवाक्ष्याविनिसृताःयाऊर्जमभिविंवक्षितिदेवप्रेषितामहीःपातामिदंकर्मणोसर्वमि
दंजायतेजगत्॥५

मीतिकृत्वा।आशाःपितृभ्यःस्वधयातेअक्षन्नजानन्नग्नेपुनरप्येहिदेवान्नित्यं...तान्यवदा
नानिब्राह्मणेभ्योददातिहृदयमेवाग्रेहृदयमेवाग्रेधस्तव्यंमतन्तुमथदक्षिणंपथाग्र
हमनंकुरुतेगामनामंत्र्यास्तःकृत्वाब्राह्मणेभ्योददातिसयेहकेचैतस्यमासंलभंते
सर्वेहवाअस्यतेगोभाजःशोभतेत्वामात्यजयानश्यानानान्नाद्यमुक्तइतिकृत्वामात्यहो
माऊहोतिएषहवावउपवसथउपहास्मिंदेवावसंतिप्रातःकृष्यामोवामंवाच्छिये
तद्धैवदेवानांवामंवसुयदाग्नेयोऽष्टाकपालउपहैनंवामंवसुगच्छतियस्यहवाएतामे
वंविद्वान्नाककल्पयतेसर्वपाप्मानंतरतितरतिब्रह्महत्यामपपुनर्मृत्युंजयती
तिहोवाचप्रजापतिस्तानिहवाएतानिकूष्मांडानीत्याचक्षतेकाजयानीतिवामास
होमाइतिवातिमोक्षाइतिवासर्वस्मिंवाह्यस्मिंलोकेपापंकुर्वंतिरोसर्वस्मात्तेमुच्यन्ते
णाःस्वर्गंलोकमेतीतिहोवाचप्रजापतिः॥४॥ इतिबौधायनसूत्रेद्वितीयःप्रश्नः॥ ॥

११ अग्नीनाधास्यमानो भवति स उपकल्पयत ऊषान्सिकता आखूत्करं वल्मीकवपां
सूददं वराहविहतं पुष्करपर्णं शर्कराश्चेत्येते पार्थिवा अथ वानस्पत्या अश्वत्थ
श्चोदुंबरश्च पर्णश्च शमी च विकंकतश्चाशनिहतश्च वृक्षः शमीगर्भारणी कुंजकुलायं
त्रिविष्टवाश्चच्छस्यति तिस्रः समिध आर्द्राः सपलाशाः सप्रारोहाः प्रादेशमात्रीरप्रतिशु
ष्कायाश्च हिरण्यशकलास्त्रीन्त्रिवृणं स्त्रीराजतानश्वं पूर्ववाहं रथचक्रं श्रोत्रादनिका
न्व्रीहीन्त्सर्वौषधं लोहितं चर्मानडुहं नवानि यज्ञपात्राणि यथाख्यामरणी आहरति
योऽश्वत्थः शमीगर्भ आरुरोह त्वे सचा। तं ते हरामि ब्रह्मणा यज्ञियैः केतुभिः सहेत्य
थातो नक्षत्राणामेव मीमांसा कृत्तिकास्वग्निमादधीत रोहिण्यामग्निमादधीत पु
नर्वस्वोरग्निमादधीत पूर्वयोः फल्गुन्योरुत्तरयोः फल्गुन्योश्चित्रायामित्यथात
ऋतूनामेव मीमांसा वसन्ते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्यो १९

वर्षासु रथकार इत्यथो खलु यदेवैनं श्रद्धोपनमेदथादधीत सैवास्य ऋद्धिरिति तत्तेताद्दृ
र्त्स्यति वेलं यामेवायुक्तस्याथ वैश्वानरं भवति यो रोहिण्यामग्निमाधत्त ऋध्नो
त्येव सर्वान्रोहान्रोहति सा या वैशाख्याः पौर्णमास्या उपरिष्टादमावास्या भवति सा
सकृत्संवत्सरस्य रोहिण्या संपद्यते तस्यामादधीतेत्यथास्यैतत्पुरस्तादेवजुष्टे देवय
जनेऽगारं वा मितं वाकारितं भवति तस्य हृद्धादो कुर्वंति प्राचीनं दक्षिणान्वमध्ये गार्हपत्य
स्यायतनं कुर्वंति पुरस्तादष्टादश विक्रमेष्वाहवनीयस्यापि वान्यक्ष्यनिर्मिते दक्षिणतो वि
थुवत्स्वन्वाहार्यपचनस्यापि वा यथा होभागे प्राग्यात मेकं पश्चादत्येव अधो हृत्या वृक्षि
केभ्यः पात्रं वपते नखानि कृंतते एवं पत्नी केशश्मश्रुभोमानुशेषणाकंकरिणालंकृतो
भवतोऽहतं वाससी वसाथाभ्यां व्रतोपायनीयं पाययति मध्यमास्तिष्ठतो भवतः सिमिमिश्रस्य
पयोमिश्रस्याथाधिवृक्षसूर्ये यान्चकि सर्वौषधमाज्यस्थालीं सत्तुवां मुस्तुरं बाहे

वीसो दीप्यां छकलानित्यत्र समादाय संप्रछन्नां अंबरीषं वो त्तपनीयं वाभिप्रव्रजंति त
सिंन्द्रीप्यां छकलान्संप्रकीर्यबर्हिषापरिस्तीर्याज्यं विलाप्योत्पूया अलिनोपस्तीर्णा
भिघारिताः सर्वौषधं जुहोत्यग्नये स्वधायपुरुषे प्रजननाय स्वाहेत्यथ यजपानभ्या
ताना त्रा छ्रुस्तत इति कृत्वा मार्व होमा जुहोत्यप स्रुवि चतुर्गृहीतं गृहीत्वा प्राजापत्या
जुहोति प्रजापते नत्व देतान्यन्य इत्यपरं चतुर्गृहीत्वा नैरृत्यां जुहोत्यन्वग्निरुष
साम ग्रमख्य दन्व हानि प्रथमो जातवेदाः। अनुसूर्यस्य पुरुत्रा च रश्मीननु द्यावापृ
थिवी आततान स्वाहेत्यथैतानंग्नीन्गारान्हतमेवाधयावेवायजमानोग्न्हत्वायुषे वो
गृह्णामि तेजसे वो गृह्णामि तपसे वो गृह्णामि वीर्याय वो गृह्णामि ब्रह्मवर्चसाय वो गृ
ह्णामीत्यथैनाना दायोतिष्ठ सायुर्मामा विशतु भूतिर्मा माविशतु ब्रह्मवर्चसं मा १२
माविशत्विति तानध्वर्यवे संप्रदायोदायं सन्वारब्धे यजमाने एतैरेव यथेतमे